आच्छाद्यैरण्डपत्रेण स्यादुष्णं यामयुग्मतः ॥
धान्यराशौ न्यसेत् पश्चादहोरात्रात्तदुद्धरेत् ।
संचूर्ण्य गालयेद्वस्त्रे सत्यं वारितरं भवेत् ॥
त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः ।
नवभागोन्मितैरेतैः सम एष रसो भवेत् ॥
निष्कद्वयमितं नित्यं मधुना सह लेहयेत् ।
अयममिरसो नाम्ना कासक्षयहरः परः ॥'
इति अमिरसः शार्ङ्गधरे ॥"
इति भावप्रकाशस्य मध्यखण्डे द्वितीयभागे राजयक्ष्माधिकारः ॥ * ॥ (अथास्य पौराणिकं विवरणं यथा,—
"दिवौकसां कथयतामृषिभिर्वै श्रुता कथा ।
कामव्यसनसंयुक्ता पौराणी शशिनं प्रति ॥
रोहिण्यामतिसक्तस्य शरीरं नानुरक्षतः ।
आजगामाल्पतामिन्दोर्देहः स्नेहपरिक्षयात् ॥
दुहितॄणामसम्भोगाच्छेषाणाञ्च प्रजापतेः ।
क्रोधो निश्वासरूपेण मूर्त्तिमान्निःसृतो मुखात् ॥
प्रजापतेर्हि दुहितॄरष्टाविंशतिमंशुमान् ।
भार्य्यार्थं प्रतिजग्राह न च सर्व्वास्ववर्त्तत ॥
गुरुणा तमवध्यातं भार्य्यास्वसमवर्त्तिनम् ।
रजोऽन्वमवलं दीनं यक्ष्मा शशिनमाविशत् ॥
सोऽभिभूतोऽतिगुरुणा गुरुक्रोधेन निष्प्रभः ।
देवदेवर्षिसहितो जगाम शरणं गुरुम् ॥
अथ चन्द्रमसः शुद्धां मतिं बुद्ध्वा प्रजापतिः ।
प्रसादं कृतवान् सोमस्ततोऽश्विभ्यां चिकित्-
सितः ॥
स विमुक्तग्रहश्चन्द्रो विरराज विशेषतः ।
तेजसा वर्द्धितोऽश्विभ्यां शुद्धं सत्त्वमवाप च ॥
क्रोधो यक्ष्मा ज्वरो रोग एकोऽर्थो दुःखसंज्ञितः ।
यस्मात् स राज्ञः प्रागासीद्राजयक्ष्मा ततो
मतः ॥
स यक्ष्मा हुङ्कृतोऽश्विभ्यां मानुषं लोकमागतः ।
लब्ध्वा चतुर्व्विधं हेतुं समाविशति मानवान् ॥
अयथाबलमारम्भं वेगसन्धारणं क्षयम् ।
यक्ष्मणः कारणं विद्यात् चतुर्थं विषमाशनम् ॥"
अस्य विशेषहेतुर्यथा,—
"युद्धाध्ययनभाराध्वलङ्घनप्लवनादिभिः ।
पतनैरभिघातैर्वा साहसैर्वा तथापरैः ॥
अयथाबलमारम्भैर्जन्तोरुरसि विक्षते ।
वायुः प्रकुपितो दोषावुदीर्य्योभौ विधावति ॥"
तथास्य लक्षणादिकं यथा,—
"स शिरःस्थः शिरःशूलं करोति गलमाश्रितः ।
कण्ठोद्ध्वंसञ्च कासञ्च स्वरभेदमरोचकम् ॥
पार्श्वशूलञ्च पार्श्वस्थो वर्च्चोभेदं गुदे स्थितः ।
जृम्भां ज्वरञ्च सन्धिस्थ उरःस्थश्चोरसो रुजम् ॥
क्षणनाच्चोरसो रक्तं कासमानः कफानुगम् ।
जर्ज्जरेणोरसा कृच्छ्रमुरःशूली निरस्यति ॥
इति साहसिकं यक्ष्मा रूपैरेतैः प्रपद्यते ।
एकादशभिरालब्धो भजेत्तस्मात् साहसम् ॥
ह्रीमत्त्वाद्वा घृणित्वाद्वा भयाद्वा वेगमागतम् ।
वातमूत्रपुरीषाणां निगृह्णाति यदा नरः ॥
तदा वेगप्रतीघातात् कफपित्ते समीरयन् ।
ऊर्द्धं तिर्य्यगधः कुर्य्याद्विकारान् कुपितोऽनिलः ॥
प्रतिश्यायञ्च कासञ्च स्वरभेदमरोचकम् ।
पार्श्वशूलं शिरःशूलं ज्वरमंसावमर्द्दनम् ॥
अङ्गमर्द्दं मुहुश्छर्द्दिर्वर्च्चोभेदं त्रिलक्षणम् ।
रूपाण्येकादशैतानि यक्ष्मा यैरुच्यते महान् ॥"
इति चरके चिकित्सास्थाने अष्टमेऽध्याये ॥
अस्य चिकित्सा यथा,—
"काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्र-
कम् ।
विद्रुमं म्लतवैक्रान्तं तारं ताम्रञ्च वङ्गकम् ॥
कस्तूरिका लवङ्गञ्च जातिकोषैलवालुका ।
प्रत्येकं बिन्दुमात्रञ्च सर्व्वं मर्द्द्यं प्रयत्नतः ।
कन्यानीरेण संमर्द्द्य केशराजरसेन च ।
अजाक्षीरेण संभाव्यं प्रत्येकं दिवसत्रयम् ॥
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
अनुपानं प्रदातव्यं यथादोषानुसारतः ॥
नानारोगप्रशमनं सर्व्वोपद्रवसंयुतम् ।
क्षयं हन्ति तथा कासं यक्ष्माणं श्वासमेव च ॥
प्रमेहान् विंशतिश्चैव दोषत्रयसमुत्थितान् ।
सर्व्वान् रोगान् निहन्त्याशु भास्करस्तिमिरं
यथा ॥"
इति हरकाञ्चनाभ्रवटी ॥
"शिलाजतुमधुव्योषताप्यलौहरजांसि च ।
क्षीरेणालोडितस्याशु यक्ष्मा क्षयमवाप्नुयात् ॥"
इति शिलाजत्वादिलौहम् ॥*॥
इति वैद्यकरसेन्द्रसारसंग्रहे राजयक्ष्माधि-
कारे ॥ * ॥ )

यच्छत्, [ ऋ ] त्रि, दानकर्त्ता । उपरमकर्त्ता । दानधातोर्यमधातोश्च शतृप्रत्ययेन निष्पन्नः ॥

यज, ऐ ञ औ देवार्च्चादानसङ्गतौ । इति कविकल्पद्रुमः ॥ · ( भ्वा०-उभ०-सक०-अनिट् । ) सङ्गस्य कृतिः सङ्गकृतिः । ऐ, इज्यात् । ञ, यजति यजते विष्णुं सुधीः पूजयतीत्यर्थः । पशुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थः । यजति सन्तं सन् सता सह सङ्गं करोतीत्यर्थः । औ, यष्टा । इति दुर्गादासः ॥

यजतः, पुं, (यजतीति । यज्+"भृमृदृशियजिपर्व्विपच्यमितमिनमिहर्य्यिभ्योऽतच् ।" उणा० ३।११०।इति अतच् ।) ऋत्विक् । इति सिद्धान्तकौमुदी ॥ ( ऋषिविशेषः । स तु ऋग्वेदस्य ५ म० ६७।६८ । सूक्तयोः ऋषिः ॥ त्रि, यष्टव्यः । यथा, ऋग्वेदे । १ । १८१ । ३ ।
"अहंपूर्व्वो यजतो धिष्ण्या यः ॥"
"यजतो यष्टव्यः ।" इति तद्भाष्ये सायणः ॥
तथा च तत्रैव । २ । ५ । ८ ।
"यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।"
"यजतेभ्यः सर्व्वेभ्यो यजनीयेभ्यो देवेभ्यः ।"
इति तद्भाष्ये सायणः ॥)

यजतिः, पुं, (यज्+बाहुलकात् अतिः ।) यागः । यथा,—
"यजतिषु येयजामहं कुर्य्यान्नानुयाजेषु ।"
इति मलमासतत्त्वधृता श्रुतिः ॥

यजत्रः, पुं, (यजतीति । यज्+"अमिनक्षियजिवधिपतिभ्योऽत्रन् ।" उणा० ३ । १०५ । इति अत्रन् । ) अग्निहोत्री । इत्युणादिकोषः ॥ (यजनशीले, त्रि । यथा, ऋग्वेदे ।७।५२।१६।
"पिता च तन्नो महान् यजत्रो
विश्वेदेवाः समनसो जुषन्त ॥"
"यजत्रः यजनशीलः ।" इति तद्भाष्ये सायणः ॥)

यजत्, [ऋ] पुं, यागकर्त्ता । यजधातोः शतृप्रत्ययेन निष्पन्नः ॥

यजनं, क्ली, (इज्यते इति । यज्+ल्युट् ।) यागः ।
( यथा, महाभारते । ७ । ५३ । ३७ ।
"यस्य सेन्द्रामरगणा बृहस्पतिपुरोगमाः ।
देवा विश्वसृजः सर्व्वे यजनान्ते समासते ॥")
तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः ।
यथा, मानवे १ अध्याये ।
"अध्यापनं अध्ययनं यजनं याजनं यथा ।
दानं प्रतिग्रहञ्चैव ब्राह्मणानामकल्पयत् ॥"
अस्य लक्षणं यथा । पशुक्षीराज्यपुरोडाशसोमौषधिचरुप्रभृतिभिर्हविर्भिः खदिरपलाशाश्वत्थन्यग्रोधोडुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमुषलकुठारखनित्रयूपदारुदर्भचर्म्मग्रावपवित्रभाजनादिभिर्द्रव्योपकरणैरुद्गातृहोत्रध्वर्य्युब्रह्मादिभिरृत्विग्भिः काम्यनैमित्तिकानां पद्मादिपूर्व्वकाणां यथोक्तदक्षिणानां समापनं यजनम् । इति श्राद्धविवेकधृतदेवलवचनम् ॥
(इज्यतेऽत्रेति । यज्+अधिकरणे ल्युट् । यज्ञस्थानम् । यथा, श्रीमद्भागवते । ४ । ४ । ६ ।
"न्टद्दार्व्वयःकाञ्चनदर्भचर्म्मभि-
र्निसृष्टभाण्डं यजनं समाविशत् ॥"
"यजनं यज्ञस्थानम् ।" इति तट्टीकायां श्रीधरस्वामी ॥ )

यजन्तः, पुं, यागकर्त्ता । यजधातोर्झच्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

यजमानः, पुं, (यजतीति । यज्+शानच् ।) अध्वरे आदेष्टा । तत्पर्य्यायः । व्रती २ यष्टा ३ । इत्यमरः ।२।७।८॥ (यथा, श्रीमद्भागवते । ३।१६।८ ।
"नाहं तथाद्मि यजमानहविर्वितान
श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन ॥" )
"ब्रह्मादित्रयं यजमाने । अध्वरे यागविषये मम इदसम्पादनाय यथार्थं कर्म्म कुरु इति ऋत्विजामादेशको यागस्वामी ब्रह्मादिशब्दत्रयवाच्य इत्यर्थः । व्रतमेणाजिनादिधारणं विद्यतेऽस्य व्रती इन् । यजते इति तृनि यष्टा । शाने यजमानः । स व्रती सोमपानवति अध्वरे यजमानः सन् दीक्षित उच्यते अन्यत्राप्युपचारात् । दीक्ष मौण्ड्येज्योपनयनव्रतादेशेषु क्तः दीक्षाशब्दादितो वा ।" इति भरतः ॥

यजाकः, त्रि, (यजतीति । यज् दाने+आकन् ।) दानकर्त्ता । इत्युणादिकोषः ॥

यजिः, पुं, (यजतीति । यज्+"सर्व्वधातुभ्य इन् ।" उणा० ४।११७। इति इन् ।) यष्टा । इत्युणादिकोषः ॥